International Journal of Advance and Applied Research
www.ijaar.co.in
ISSN – 2347-7075 Impact Factor – 8.141
Peer Reviewed Bi-Monthly
Vol. 7 No. 35 March – April - 2026

# प्रकृतिरमणीयतायाः काव्यचित्रकारः कालिदासः : पर्यावरणरक्षणस्य शाश्वतप्रेरणास्रोतः

**डॉ. अनिरुद्ध अ. मंडलिक**

*संस्कृत-विभागध्यक्ष:, संगमनेर महाविद्यालय:, संगमनेरम्*

*Corresponding Author – डॉ. अनिरुद्ध अ. मंडलिक*

DOI - 10.5281/zenodo.20485527

***सहायक निबन्ध सारां:***

*महाकविकालिदासस्य पर्यावरणसंरक्षणसन्देशस्य विमर्श: कर्तव्य:। जगच्छ्रेष्ठमहाकविना स्वकाव्ये वर्णितानि निसर्ग(प्रकृति)वर्णनानि कवेः प्रकृतिस्नेहस्य स्वीकृतिपत्रं दीयन्ते ।*

*महाकवि-कालिदासेन स्वकाव्येषु वर्णितानि प्रकृतिवर्णनानि पर्यावरणसंरक्षणार्थं प्रेरणादायकानीति । कवे: सर्वासु कलाकृतिषु निसर्गदर्शनं भवति । इत्यत्र वृक्ष-पुष्प-खग-ऋतु-सूर्य-चन्द्र-प्राणि-आदिवर्णनमस्माकं मनसि स्नेहभावमुत्पादयति। महाकविना भारतभूमिस्थाया: प्रकृतेर्वर्णनेन भरतभूप्रेम्णा च पर्यावरणरक्षणस्य संदेशो दीयते।*

*अत: सर्वे पर्यावरणसंवर्धनार्थं प्रयत्नशीला भवाम: । महाकविकालिदासस्य सन्देशस्योपदेशस्य च पालनं निश्चयेन कुर्म: । इत्येव संदेशो दातव्य इत्यस्य लेखनस्योद्देश: ।*

*महाकविकालिदासविषये महर्षि-अरविन्दवर्यै: सूक्तम् - कालिदासस्य कलाकृति: काव्यं वा सर्वश्रेष्ठं किमर्थमस्ति? अस्येकमेवोत्तरमस्ति यत् 'तत्सर्वश्रेष्ठं तस्य कारणं तत्सर्वश्रेष्ठम् इति' (It is good because it is good) अस्यान्युदुत्तरं नास्त्येव ।*

*अत्र रवीन्द्रनाथ टागोर इति वार्याणां कालिदाससम्बन्धिनो मार्मिकान् शब्दानुद्धरामि । ते कथयन्ति यत् ' हे अमरकवे ! अस्माकं सदृशानि सुखानि दु:खानि वा आशा-निराशाद्वन्द्वानि भवन्तं कदापि नासीत् किल ? तथापि भवत: काव्यरूपकमलमानन्दसूर्यं प्रति सम्मुखीभूय निर्लेप-निर्मलतया प्रफुल्लितम् । तस्मिन्दु:ख-दैन्य-दुर्दिन-एतेषां कुत्रापि चिह्नं न दृश्यते । जीवनस्य मन्थनयुत्पन्नं विषं भवन्त: स्वयं प्राश्नन्, उत्पन्नममृतं समस्तलोकेभ्योऽयच्छन्निति।*

***प्रमुखबिन्दव: - पर्यावरणं, प्रकृतिस्नेह:, प्रकृतिवर्णनम्, महाकविकालिदास***

**प्रस्तावना:**

भारतीयसाहित्यपरम्परायां कालिदास महाकविः प्रकृतिवर्णनस्याप्रतिमः कलाकार इति प्रसिद्धः। तस्य काव्येषु प्रकृतेः सौन्दर्यं, कोमलता, जीवनदायिनीशक्तिश्चात्यन्तं मनोहारीररूपेण चित्रितमस्ति। वनानि, पर्वताः, नद्यः, ऋतवः, वृक्षलतादयः तस्य काव्ये केवलं दृश्यवस्तूनि न सन्ति, अपि तु जीवमानाः सहचरा इव अनुभूयन्ते। महाकविना कालिदासेन प्रकृति मातृरूपेणादृत्य मानवजीवनस्यविभाज्याङ्गत्वेन प्रतिपादिता । तस्य काव्येषु प्रकृत्या सह मानवस्य स्नेहसम्बन्धः, सहजीवनभावना च स्पष्टतया दृश्यते । विशेषत ऋतुसंहारः, मेघदूतं, अभिज्ञानशाकुन्तलं तथा कुमारसम्भवमित्यादिषु ग्रन्थेषु प्रकृतिसौन्दर्यस्य सूक्ष्मं चित्रणं दृष्टुं शक्यते । अद्यतनकाले पर्यावरणस्यावनतिः, वननाशः, प्रदूषणवृद्धिश्च मानवसमाजस्य गम्भीरसमस्याभवत् । एतादृशे काले कालिदासस्य काव्येषु व्यक्तः प्रकृतिप्रेमभावो मानवजातिं पर्यावरणरक्षणाय प्रेरयितुं समर्थोऽस्ति। तेन कालिदासस्य प्रकृतिस्नेहो न केवलं साहित्यिकसौन्दर्यस्य द्योतकः, अपि तु पर्यावरणसंरक्षणस्य महत्त्वपूर्णं प्रेरणास्थानपि भवति। अत एव **"प्रकृतिरमणीयतायाः काव्यचित्रकारः कालिदासः :**

**पर्यावरणरक्षणस्य शाश्वतप्रेरणास्रोतः"** इति विषयः अद्यतनपरिस्थितौ अत्यन्तं प्रासङ्गिको मन्यते।

*महाकविकालिदासस्य पर्यावरणसंरक्षणसन्देशस्य विमर्शः कर्तव्यः। जगच्छ्रेष्ठमहाकविना स्वकाव्ये वर्णितानि निसर्ग (प्रकृति) वर्णनानि कवेः प्रकृतिस्नेहस्य स्वीकृतिपत्रं दीयन्ते ।*

*महाकवि-कालिदासेन स्वकाव्येषु वर्णितानि प्रकृतिवर्णनानि पर्यावरणसंरक्षणार्थं प्रेरणादायकानीति । कवेः सर्वासु कलाकृतिषु निसर्गदर्शनं भवति । इत्यत्र वृक्ष-पुष्प-खग-ऋतु-सूर्य-चन्द्र-प्राणि-आदिवर्णनमस्माकं मनसि स्नेहभावमुत्पादयति। महाकविना भारतभूमिस्थायाः प्रकृतेर्वर्णनेन भरतभूप्रेम्णा च पर्यावरणरक्षणस्य संदेशो दीयते।*

*'ऋतुसंहारम्' इति काव्यस्य षट्सु खण्डेषु षड्-ऋतूनां वर्णनं सजीवं भासते । ग्रीष्म-ऋतौ प्रखरताया वर्णनं ग्रीष्म-ऋतोरनुभावयति । चन्द्रोदयस्य, सायंकालस्य च वर्णनं मन आनन्दयति आह्लादयति च । वर्षा-ऋतौ फुल्लितानि पुष्पाणि, जलबिन्दुभिर्नृत्यन्ति हरितानि च वृक्षपर्णानि, केतकी-कन्दली-मालती-बकुल-यूथिका-कदम्बादि-वर्णनानि कवेः काव्यस्यापूर्वत्वं प्रकटीकुर्वन्ति । प्रदीप्तया विद्युता प्रकाशमानाः, गर्जयन्तः, जलभारेण विनीताः, इन्द्रधनुना शोभमानाश्च मेघा हृदयं मोदयन्ति । हरिततृणेन भूमिः शुशोभिता । कमलदलानि कमलिन्याः पर्णानि च जलवर्षावेन पतितानि प्रकीर्णानि च । अपगाः सागरगामिन्यः । हंसाश्चञ्चौ मृणालतन्तुं गृहीत्वा मानससरोवरं प्रति गच्छन्तीति । ऋतुसंहारे वर्णितानि शरद्-हेमंत-शिशिर-वसंत-ऋतु-वर्णनान्यपि ऋतुसौन्दर्यं प्रत्यक्षरूपेणेवानुभावयन्तीति मन्ये । यथा,*

'प्रफुल्लचूताङ्कुरतीक्ष्णसायकः
द्विरेफमालाविलसद्धनुर्गुणः।[१]'

प्रफुल्लानामाम्रवृक्षाणामङ्कुरा एव तीक्ष्णाः सायका यस्य, तथा द्विरेफाणां (भृङ्गाणां) माला एव विलसन्ती धनुषो गुणो यस्य स वसन्तऋतुः कामदेवस्येव रूपेण प्रकटते । अत्र कविना वसन्तऋतुः कामदेवस्य रूपेण कल्पितः।

आम्रवृक्षस्य प्रफुल्ला अङ्कुराः कामदेवस्य तीक्ष्णा बाणा इव सन्ति। द्विरेफाणां माला (भृङ्गाणां पङ्क्तिः) कामदेवस्य धनुषो गुण इव शोभते । एवं वसन्तसमये निसर्गे सर्वत्र पुष्पसुगन्धो, भृङ्गाणां गुञ्जनं च दृश्यते। अत कविस्तं वसन्तं कामदेव इव सज्ज इति रूपकेण वर्णयति ।

*मेघदूतयाषाढमासयागतानामचेतनानां धूम-प्रकाश-जल-वायु-रूपस्थानां च मेघानां वर्णनं कृत्वा कविः सचेतनानां मनोभावस्याविष्करणं करोति । मेघदूतस्थानि ऋतुसंहारस्थानि च इन्द्रधनोः, मेघगर्जनायाः, तडित्-औज्वल्यस्य, तुषारपातानां, वाटिकास्थितानां वृक्षाणां, लतानां च वर्णनानि सौन्दर्यस्थलानि च निसर्गस्य मूर्तरूपं, प्राचीनकालावस्थितस्य वनस्य, पर्यावरणस्य च सुसमृद्धिं, वनसंरक्षणप्रयत्नान्धरणीलावण्यं च दर्शयन्ति ।*

*'कुमारसंभवम्' इत्यस्मिन् महाकाव्ये प्रागेव नगाधिराज-हिमालयस्य मनोहारीदृश्यं वर्णयति कविः ।*

*यथा, अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः।।*
*पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः।।[२]*

*तथैव भागीरथीदेवदारवृक्षयोः कृतं वर्णनं प्रकृतिसौन्दर्यस्य उत्तममुदाहरणमस्ति । यथा,*

*भागीरथीनिर्झरसीकाराणां वोढा मुहः कम्पितदेवदारुः ।*
*यद्वयुरन्विष्टमृगैः किरातैरासेव्यते भिन्नशिखण्डिबर्हः ।।[३]*

*प्रकृतेः सहजसौन्दर्यस्य मानवीयरागस्य, कोमलभावनानां तथा च नवनवीनकल्पनाविष्कारस्य नवनवोन्मेषस्य च वर्णनाविष्कारो नाम महाकविकालिदासस्य 'कुमारसंभवम्' तथैवान्यान्यापि काव्यानि सन्तीति ।*

*अग्निः, पर्जन्यः, सवितृ इत्यादयः 'प्रकृतिस्था घटका ईश्वररूपा एव' इति ऋग्वेदस्य यन्नियमस्तस्य एव*

*नियमस्य पालनं महाकविना कृतमिति कवेः काव्येषु दृश्यते। एतादृशैर्वर्णनैः कविः प्रत्येकस्य मनसि निसर्गस्नेहभावं प्रकटयति । हिमालयस्य वर्णेन सह कालिदासेन विन्ध्य-आम्रकूट-चित्रकूट-महेन्द्र-देवगिरि-माल्यवान्-रामगिरि-नीचगिरि-सह्य-ऋक्षवान्-त्रिकूटा एतेषां पर्वतानां सौन्दर्यस्य वर्णनं कृतम्।*

*कालिदासो निसर्गवर्णने एतावल्लीनो भवति यत्प्रकृतिस्थः प्रत्येकघटकः कालिदासाद्भिन्नो नास्तीत्येव भावोऽस्माकं मनसि प्रकटीभवति। कालिदासान्निसर्गः पृथक् क्रियते चेत्तस्य काव्यानि रसशून्यानि भवेयुरिति भयम्। यथा प्राणेन विना नैव देहस्तथैव निसर्गेण विना नास्ति कालिदास इति । कालिदासेन निसर्गस्थानां प्रत्येकानामुपर्यसीमस्नेहः कृतः।*

*'अभिज्ञानशाकुन्तलम्' अस्मिन्नाटके वर्णितं प्रकृतिवर्णनं निसर्गेण सह कवेरखण्डः शाश्वतश्चाप्तसंबन्धो दर्शयति। मानवस्य स्नेहस्पर्शेन प्राणिनोऽपि जीवनात्परं स्नेहं कुर्वन्ति । अस्य मूर्तिमन्तमुदाहरणम् 'अभिज्ञानशाकुन्तलम्' इति नाटकस्य प्रथमेऽङ्के द्रष्टुं शक्यते।*

*यदा राजा दुष्यन्तः कण्वमुनि-आश्रमे मृगयार्थमागच्छति, यावत्सो हरिणं मृगयति तावदाश्रमस्थस्तपस्वी वैखानसः राज्ञे वन्यजीवसंरक्षणविषययुपदेशं कृत्वा मृगयार्थं विरुणद्धि, स उपदेशो वन्यजीवसंरक्षणसूचकोऽस्तीति। यथा,*

*न खलु न खलु भाणः सन्निपात्योऽयमस्मिन् मृदुनि मृगशरीरे*
*तूलराशाविवाग्निः।*
*क्व बत हरिणकानां जीवितञ्चातिलोलं क्व च*
*निशितनिपाता वज्रसाराः शरास्ते ।।[४]'*
*तत्साधुकृतसंधानं प्रतिसंहर सायकम्। आर्तत्राणा वः शत्रं न*
*प्रहर्तुमनागसि।।[५]*
*अस्मिन् श्लोके के. वि. गोडबोले वर्येण मराठीभाषायां*
*समश्लोको विरचितोऽस्ति, तदतीवमधुरः -*

*नच नच शर बापा टाकणें या मृगाच्या मृदु शरिरीं निखारा*
*जेविं पोटीं फुलांच्या।*
*हळुवट हरिणाचा जीव कोठें बिचारा अति कठिण कुठें हे*
*बाण ज्यां तीक्ष्ण धारा।।[६]*
*अचुक लाविला नेम तो मागें घेइं हा शर। आर्तत्राणा*
*पौरवास्त्र न प्रहारा मुक्यांवर ।।[७]*
*(पृ.क्र. ५८, गोडबोले)*

*इत्यत्र मृदुनि मृगशरीरे, हरिणकानां जीवितञ्चातिलोलं, न प्रहर्तुमनागसिहे च इत्येते शब्दा हरिणस्य निरागसतां, कोमलतां, निष्पापकत्वं, तेषां हृदयभीरुतां च वर्णयन्ति । इदं वर्णनं निष्पापकेष्वत्याचारोऽयोग्योऽस्ति, तेषां संरक्षणं कर्तव्यं चेत्येतादृषी भावना प्रत्येकस्य मनसि प्रकटीकरोति।*

*आश्रमपरिसरवर्णने वृक्ष-हरिण-सरोवर-बालमृगाणां वर्णनं निसर्गे रमयति सर्वान्। निसर्गे निःसीमस्नेहः कर्तव्यः, तेन निसर्गे सहजतया स्नेहसंबन्धो दृढीभवति, अत्र नास्ति संशयः। यथा,*

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्याः भवत्युत्सव
सा युष्मानभिनन्दति प्रियसखी शकुन्तला याति सः।।[८]

अत्र शकुन्तलाश्रमेषु वृक्षाणामुपरि स्वसख्येव स्निह्यति । अस्मिन् श्लोके शकुन्तलाया वृक्षेषु महान् स्नेहभावः प्रतिपादितः कविना। शकुन्तला स्वजीवनं प्रकृत्या सहात्यन्तं सम्बद्धं मन्यते। सा प्रथमं स्वयं जलपानार्थं न प्रवृत्ता, अपि तु सा पूर्वमेव वृक्षाञ्जलं पाययित्वानन्तरं स्वयं पिबतीति। सः तस्याः करुणामयस्वभाव एव। तथा च सा वृक्षाणां हानिर्न भवेदिति भावेन तेषां पल्लवान्न छिनत्ति स्नेहभावेन सा वृक्षाणां कोमलान्पल्लवानलङ्काररूपेणापि न परिधारयति च । कुसुमप्रफुल्लनकालं सा आनन्दोत्सववदनुचरति, अर्थात् वृक्षाणां पुष्पप्रसवस्तस्याः

कृते आनन्दस्य कारणमेव । अत एते वृक्षा अपि तां स्वां प्रियसखीमिव मन्यन्ते ।

अस्य श्लोकस्य मुख्यो भावोऽस्तीति मानवा: प्रकृत्या सह सख्यभावेनैव समाचरेदिति । अत्र शकुन्तलायाश्चरित्रेण कविर्दर्शयति यन्मनुष्यो यदि प्रकृतेः संरक्षणं करोति, तर्हि प्रकृतिरपि तं मित्रवदनुगच्छति ।

*स्वदु:खं विस्मृत्य प्रकृतिं स्वाप्तं मत्वा सर्वान्भूतगणान् 'त्वयि अहम् अस्मि, मयि त्वमसि' इति भावनया निसर्गं स्वमध्ये स्थापयित्वा निसर्गेन सह सुदृढ: संबन्धो निर्मित: कविना । मानवस्य मन: आह्लादयत् मन्द-शीतल-पवन-प्रवाहेन सर्वानानन्दयच्च कालिदासेन ।*

*अत: सर्वे पर्यावरणसंवर्धनार्थं प्रयत्नशीला भवाम: । महाकविकालिदासस्य सन्देशस्योपदेशस्य च पालनं निश्चयेन कुर्म: । इत्येव संदेशो दातव्य इत्यस्य लेखनस्योद्देश: ।*

*महाकविकालिदासविषये महर्षि-अरविन्द वर्यै: सूक्तम् – कालिदासस्य कलाकृति: काव्यं वा सर्वश्रेष्ठं किमर्थमस्ति? अस्येकमेवोत्तरमस्ति यत् 'तत्सर्वश्रेष्ठं तस्य कारणं तत्सर्वश्रेष्ठमेवेति' (''The best part of every great work is always inexplicable: It is good because it is good; and innocently gracious, opening as the green of the earth, and falling as the dew of heaven.'') (पृ.क्र. २८, गोडबोले)[९] अस्यान्यदुत्तरं नास्त्येव।*

*अत्र रवीन्द्रनाथ टागोर इति वार्याणां कालिदाससम्बन्धिनो मार्मिकान् शब्दानुद्धरामि । ते कथयन्ति यद् ' हे अमरकवे ! अस्माकं सदृशानि सुखानि दु:खानि वा आशा-निराशाद्वन्द्वानि भवन्तं कदापि नासीत् किल ? तथापि भवत: काव्यरूपकमलमानन्दसूर्यं प्रति सम्मुखीभूय निर्लेप-निर्मलतया प्रफुल्लितम् । तस्मिन् दु:ख-दैन्य-दुर्दिन-एतेषां कुत्रापि चिह्नं न दृश्यते । जीवनस्य मन्थनयुत्पन्नं विषं भवन्त: स्वयं प्राश्नन्, उत्पन्नममृतं समस्तलोकेभ्योऽयच्छन्निति।*

*सत्यं यन्म*हाकविः कालिदासो भारतीयकाव्यपरम्परायां प्रकृतिवर्णनस्याद्वितीयः काव्यचित्रकार इति । तस्य काव्येषु प्रकृतेः सौन्दर्यं केवलं दृश्यवर्णनरूपेण न, अपि तु जीवनस्याभिन्नाङ्गत्वेन प्रतिपादितमस्ति । गिरयः, वनानि, नद्यः, ऋतवः, लताः, वृक्षाः, पक्षिणश्च सर्वेऽपि तस्य काव्ये चेतनवद्भावेन चित्रिताः सन्ति। एतत् दर्शयति यन्मानवजीवनं प्रकृतेः सह घनिष्टसम्बन्धेन सम्बद्धमस्ति । तस्य काव्येषु प्रकृतिस्नेहः, सहजीवनभावना तथा पर्यावरणसंरक्षणस्य सूक्ष्मसन्देशोऽप्यन्तर्निहितो दृश्यते । यथाऽऽश्रमजीवनवर्णनेषु वृक्षलतादीनां प्रति मानवानां स्नेहः, पशुपक्षिणां संरक्षणम्, तथा प्रकृतेः समन्वितजीवनपद्धतिरत्यन्तं रमणीयतया निरूपिताऽस्ति । अतः कालिदासस्य काव्यं केवलं काव्यसौन्दर्यस्य निधिर्न, किन्तु पर्यावरणरक्षणस्य शाश्वतप्रेरणास्रोतोऽप्यस्ति । अद्यतनपर्यावरणसंकटस्य काले तस्य काव्यानि मानवसमाजाय स्मारयन्ति यत्प्रकृतेः संरक्षणमेव मानवसभ्यतायाः स्थैर्यस्य आधारोऽस्ति परमं कर्तव्यमस्ति च ।

संदर्भ:


1. *ऋतुसंहारम् १.१*
2. *कुमारसम्भवम् -१.१*
3. *कुमारसम्भवम् -१.१५*
4. अभिज्ञानशाकुन्तलम् -१.१०
5. अभिज्ञानशाकुन्तलम् -१.११
6. महाराष्ट्र शाकुन्तल १.१०
7. महाराष्ट्र शाकुन्तल १.११
8. अभिज्ञानशाकुन्तलम् - ४.९
9. महाराष्ट्र शाकुन्तल

*संदर्भग्रन्था:*

1. कालिदास. (2012). *अभिज्ञानशाकुन्तलम्* (संपा. हरिदत्त शास्त्री). वाराणसी: चौखम्बा संस्कृत संस्थान.
2. कालिदास. (2006). *अभिज्ञानशाकुन्तलम्* (संपा. एम. आर. काले). दिल्ली: मोतीलाल बनारसीदास.
3. कालिदास. (2011). *ऋतुसंहार:* (संपा. रामकुमार शर्मा). वाराणसी: चौखम्बा विद्याभवन.
4. कालिदास. (2013). *कालिदास ग्रंथावली* (संपा. सीताराम चतुर्वेदी). वाराणसी: चौखम्बा विद्याभवन.
5. कालिदास. (2009). *कुमारसंभवम्* (संपा. सीताराम चतुर्वेदी). वाराणसी: चौखम्बा विद्याभवन.
6. कालिदास. (2004). *कुमारसंभवम्* (संपा. एम. आर. काले). दिल्ली: मोतीलाल बनारसीदास.
7. गोडबोले, के. वि. (1968). *महाराष्ट्र शाकुन्तल*. पुणे: व्हीनस प्रकाशन.